श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३२

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३२

*मत्स्यावतारवर्णनम्*

पुरा हयग्रीवमहासुरेण
    षष्ठान्तरान्तोद्यदकाण्डकल्पे।
निद्रोन्मुखब्रह्ममुखाद्धृतेषु
    वेदेष्वधित्सः किल मत्स्यरूपम्॥ १॥

सत्यव्रतस्य द्रमिलाधिभर्तु-
    र्नदीजले तर्पयतस्तदानीम्।
कराञ्जलौ सञ्ज्वलिताकृतिस्त्व-
    मदृश्यथाः कश्चन बालमीनः॥ २॥

क्षिप्तं जले त्वां चकितं विलोक्य
    निन्येऽम्बुपात्रेण मुनिः स्वगेहम्।
स्वल्पैरहोभिः कलशीं च कूपं
    वापीं सरश्चानशिषे विभो त्वम्॥ ३॥

योगप्रभावाद्भवदाज्ञयैव
    नीतस्ततस्त्वं मुनिना पयोधिम्।
पृष्टोऽमुना कल्पदिदृक्षुमेनं
    सप्ताहमास्वेति वदन्नयासीः॥ ४॥

प्राप्ते त्वदुक्तेऽहनि वारिधारा-
    परिप्लुते भूमितले मुनीन्द्रः।
सप्तर्षिभिः सार्धमपारवारि-
    ण्युद्घूर्णमानः शरणं ययौ त्वाम्॥ ५॥

www.prapatti.com

धरां त्वदादेशकरीमवाप्तां
नौरूपिणीमारुरुहुस्तदा ते।
तत्कम्पकम्प्रेषु च तेषु भूय-
स्त्वमम्बुधेराविरभूर्महीयान्॥ ६ ॥

झषाकृतिं योजनलक्षदीर्घां
दधानमुच्चैस्तरतेजसं त्वाम्।
निरीक्ष्य तुष्टा मुनयस्त्वदुक्त्या
त्वत्तुङ्गशृङ्गे तरणिं बबन्धुः॥ ७ ॥

आकृष्टनौको मुनिमण्डलाय
प्रदर्शयन् विश्वजगद्विभागान्।
संस्तूयमानो नृवरेण तेन
ज्ञानं परं चोपदिशन्नचारीः॥ ८ ॥

कल्पावधौ सप्तमुनीन् पुरोवत्
प्रस्थाप्य सत्यव्रतभूमिपं तम्।
वैवस्वताख्यं मनुमादधानः
क्रोधाद्धयग्रीवमभिद्रुतोऽभूः॥ ९ ॥

स्वतुङ्गशृङ्गक्षतवक्षसं तं
निपात्य दैत्यं निगमान् गृहीत्वा।
विरिञ्चये प्रीतहृदे ददानः
प्रभञ्जनागारपते प्रपायाः॥ १० ॥

**********